1.15

क्र. १ ब. ३ पु. २४

॥ मधुविधुरानन अष्ट पदी टीका ॥ पृष्ठ. १३

श्रीकृष्णायनमः ॥ श्रीगोपीजनवल्लभायनमः ॥ श्रीविठ्ठलकृपादृष्टिपूर्णस्वांतरसोद-
१ विस्फुरद्भाववीचीनांभाष्यंतेविदधेमया १ अथश्रीमत्प्रभुचरणनिरूपितंकुमारीणांव्रता
चरणार्थंयमुनातटंव्रजन् गुणगानव्याजनक्रियमाणंप्रभुप्रार्थनारूपंगीतंप्रकाश्यते तत्रतः
पूर्वंप्रभोःस्वसमीपस्थचस्यमन्यमानजभावोत्कोसमक्षेतरस्थमपि प्रियमन्यार्तिभरोद्गतभाव
भरेणासमक्षमिवैवमंबोधयंत्यो यद्गायंतितत्तदुच्यते विधुमधुरानन मानदमनसिजमानद
गोपीनयनचकोरपानद राधालोचनकुवलयमोदनकामवरद अंजनरजनीप्रकटतारावृताऽध
रामृतस्यंदेति १ विधोरपेक्षयाप्यधिकमधुरमाननंयस्यतादृश तास्मिनकलंकत्वविरहिणी
तापजनकत्वक्षीयमाणत्वादिकंदृश्यते भगवतित्वितरकलंकदूरीकरणसामर्थ्यंतत्तापहारक
त्वाऽनुक्षणवर्द्धनमानलावण्ययुङ्मुखवत्त्वमितिस्फुटमेवमाधुर्याधिक्यं विधुवद्धामधुरं त

घस्ययथाविधूदयेजलाधिरुद्वेलोभवति तथैवत्वन्मुखचंद्रोदये अस्मद्भावांभोधिरुद्वेलो
भवतीति तत्समानधर्मत्वमपि तथाप्यत्राधिक्यमेव यतस्तास्मिन्प्रत्यक्षएव तत्समयाव
छेदएवच्चतस्य तादृशत्वंनान्यद्रापि एतस्मिन्नंतर्हितेपियदा कदापि समयानवछेपि भा
वाब्धेरुद्वेलत्वमेवेत्याधिक्यं तथाचद्वितीयावस्थायाः संयोगफलकत्वेन सांप्रतं संयोगः सं
पादनीयइति तात्पर्यं यद्वा विधोर्यन्मध्वमृतंतद्दाति आदत्ते गृह्णाति तत्तथा तादृशमाननं
यस्येति भगवद्भिरहे विधोर्निःसारत्वशैत्यादिगुणराहित्यदर्शनेन भगवतस्तु प्रतिक्षणं
वर्द्धमानलावण्यवत्वेनचात्रैवसर्वतः सर्वमाधुर्यंसमागत्य गुंफीभूतमिति ज्ञातवत्य इतित
था नोचेत्तद्वारापि कदाचित्किंचित्परितापापगमोभवेदित्याशयः यद्वा विधुमधुरागोप्यस्ता
सामाननमिवाननंयस्येति ए तत्तुयदा कदाचित्स्वकीयं शृंगारं प्रभौ संविधायै तास्तद्वदनें

उ पश्यंति तदाकटाक्षादिभावैरात्मा च गोपी सादक्षमेवानुभवंति तत्रेतितत्स्मृत्वोक्तं तदु
२ क्तं इच्छंत्रिभुवनसुंदरगोविंदगोपसुंदरीवेषे रचितेसहजामिवाभात्तद्युक्तं तस्याहिप्रेष्ठइति
यद्वा तादृशीसा आननाएवयस्य सतथा सर्वदातन्नामेवजल्पन्तिष्ठतीतिभावः यथोक्तंजप
न्नपितवैवालापमंत्रामलीमिति तथाचतदाबाल्येपितथाकरणोऽधुनाऽकरणेचहेतुस्त्वंन
जानीमइतिभावः यद्वाविधोरपितादृक्कद्यस्य तस्यापित्वन्मुखमाधुरीपानेप्रचुरोऽभिलाष
स्तिष्ठतीतितथा ननुसईश्वरस्यैवंमेताद्वितकृतौकोवाऽनुरोधइतिसंदेहं वारंयत्यत्राहुः मा
नदेति यतस्त्वमस्मभ्यं सदामानमादृरंददासि किंच नकेवलमस्मभ्यमेवकिंतुमनासिजस्या
पितद्वद्दासीति द्वितीयंसंबोधनं मनासिजमानदेति आत्मारामस्यापितवतन्मार्गोक्ताचर
णोनकदाचित्तद्दृशीभूत इवदृश्यमानत्वेनचतत्तादृशत्वं यद्वा मानदेतिमनासिजस्यैवाविशे

षणां शेषंप्राग्वत् सोन्येभ्योददातितस्मैत्वमिति सहृदयं अथवान्येऽन्येमानदा मनसिज
श्चेत्युभयमपित्वमेवददासीति यद्वामानंखंडयसीति त्वद्दर्शनमात्रेण मानः प्रयातीति
तद्दूरीकरणसमर्थ तथैवमनसिजस्यापि मानखंडन यद्वा मानमभिमानः सौंदर्ययौवन
मदादिकं तंखंडयतीतिमानंदः सचासौमनसिजश्चेतिमानदमनसिजः एतदुक्तंनाशकन्स्म
रवेगेनेत्यत्रगोपीनां मानखंडनपरः सरंसर्वकार्याशक्तिकरत्वंस्मरस्य तथाचत्वंतु तादृशय
स्यापि तस्यत्तादृशो। सित्वन्मिलनेतस्यापि मानखंडनंजायतइतितथा अधुनापि सएवा
वसरइतितथैव कृपयेतिभावः यद्वा मानंददास्यस्मभ्यमितितथा अन्यत्ररमणकृत्वा समा
२ गतेभगवति दर्शनमात्रेणास्माकंर्मनोभवतीतितथा एवंमनसिजायापिमानंमानं मानि
नीत्वपरः सरंददासिजनयसीत्यर्थः तदुक्तंमन्मथमन्मथइत्यनेन यथाकुसुमशरदर्शने

तदितरजनानांस्त्रीभावस्तथात्वद्दर्शनस्येतिभावः एवंवानितात्वोसिद्धे तद्धर्मरूपंमान मनुक्त
सिद्धमेव यद्वा मनसिजश्चंद्रः शेषंप्राग्वत् किंचकेवलमानदत्वमात्रंत्वन्यविषयकमपि भ
गवतिस्वविषयकंविशेषमाहुः गोपीनयनेति गोपीनयनचकोरेभ्योकंविशेषमाहुः गोपी
नयनेति गोपीनयनच्चकोरेभ्योनिजवदनेंदुगलद मंदसुधारसपानंददासीतितथा यद्वा गो
पीनयनानांचकोर तद्वद्दर्शनपर व्रजसुंदरीनयनानिचकोरीभूतानियस्य पानदेतिभिन्नं
संबोधनं अधरासवपानदेत्यर्थः पानंघासिखंडयसीतिवा त्वदधरासवपानानंतरमिल
ररसखंडनंजायतइत्यर्थः यद्वागोपीवन्नयने यस्यसतथा एतदपिविपरीतशृंगाररस्पष्टं
यद्वागोपीनांनयन तद्वत्प्रियतमेति अथवास्मान ज्ञापयित्वान्यागोपीर्नय सएकांतनिकुं
जइतितन्नयनशील तथैवाधुनास्मान्नयेतिभावः गोपीर्वानयने तयोर्वायस्येतिवाचकोर

पानदेति निकुंजादकस्मा – हि रागते भगवति चकोराणां चंद्रप्रतीतिर्भवतीतितथा अत्र
चकोरइत्युपलक्षणमात्रं वस्तुतस्तु क्रीडासरोवरादिस्थ हंससारसकेकिंपिकचातककुमु
दकमलचक्रवाकानां तत्तत्समयावदेन यथोचितावस्थांकरोतीतितथा तद्यथा कमलानां
चक्राह्वानां स्वपतित्वेन स्वसंयोत्कृत्वे नच भानंतु तदा तांबूलरागकुंकुमादि संवलितत्वे
न मुखस्यताम्राभत्वात् उदयसमयेताम्रत्व प्रकाशकत्वएवतत्र प्रयोजकेनोष्णरश्मिसत्व
मपीतिनात्र दूषणापत्तिः अतएवाग्रेकुवलय मोदनेति संबोधनेन भानुत्वमपिसूचितं अ
न्येषांवसंतादि ऋतुजसमृद्युत्सरसमावानामपि हंसादीनां तु भगवद्दर्शनादमात्र प्रोद्यपुष्प
फलमधुधारावत्यादप प्रवरपरामर्षेणातत्स्वरूपस्य विद्युद्बकपंक्तिचापादिसहत्तन प्राद्य
न्नवनीलनीरदसकक्षत्वेन तन्मुखय शारदा ऽ खर्वशर्वरीश्वरगर्व पर्वतविदारणपरायणा

त्वेनचेष्टद्त्वंस्पष्टं चकोराणांपानंखंडयसिवातथा इदंतुश्रृंगारव्यत्यासवतःप्रभोस्तदनु

४ रूपलावण्यानुस्मृतंनीलांबरांतपिहितंवदनसुधानिधिंस्मृत्वोक्तं यद्वा गोपीनांनयनानीव

नयनानियासांतादृश्योहरिण्यःताश्चचकोराश्चेति तथा तेभ्योवेणुद्वारासाधरासवपानं

ददासि तादितरद्वारखंडयसीनितथा एतेनयत्रास्मिन्नयनसाम्यमात्रेणतद्रसानभिज्ञानपि

तानधरमधुपाययसितदितरखंडायस्यापिसर्वं तत्रास्मानाधिकारिणीस्तदभिज्ञाःकुतोनपा

ययसि तदन्याद्विरहज्वरखंच खंडयसीनिहृदयं उपलक्षणमेतत् वस्तुतस्तुतत्रास्थितया

वत्सशुपक्षिषुतद्वयमपिसंपादयति तदुक्तंत्वंदशोव्रजवधूषाःसरासिसारसेत्यादिषु यद्वा

१ गोपदमात्रेणात्रशुद्धभावापन्नागोप्युच्यते तथाचतस्यायत्पीडनंपृष्टमछन्नमिति यावत्

तादृशमयनंस्थानं उरोजावशक्य निर्वचनांगविशेषादिर्वा तस्यचकोर तद्वद्दर्शनासक्तेति

एतत्तु महासुरते निरावरणायोस्तयोः सतोरितरसकलक्रीडां विहाय तत्सुरततयास्थित-
प्रभुरकस्माज्जालरंध्रद्वाराकस्याश्चिन्नेत्रजनुः फलीभूत इति तत्स्मृत्वा तयैवोक्तं दर्शन
परत्वमात्रे धर्मवति प्रभौ चकोरत्वकथनेन स्वामिन्यंगेषु प्रकाशशैत्याऽमृतमयत्वबि
भावकत्वादि सुधाकरस्य धर्मत्वं ध्वन्यते तत्रैव यथा चकोरस्तच्चांद्रिकां नेत्रद्वारापि बत्यापि
तथाऽयमपि तत्र चुंबनादिदानेन तल्लावण्यांमृत संवलितरसविशेषं पिबन्निव भातस्त
देत्यपि ध्वनिः गोपीनयनेत्यत्र सवर्णादीर्घ आर्षः पानत्वेपि तद् दैर्घ्यबोधकः ध्वनिता
र्थव्यात्तनावेवं प्रयोगाः प्रांचैरप्यादत्ता मयाप्यालोरवि अतएवाग्रे पानदेति संबोधनं ते
ष्वेवं चुंबनादिदानेनाधरस्थित तांबूलरागादिरसपानं तेभ्यो ददास्यपीति सूचकं अन्यथा
तत्र तांबूलरागादिरंजितत्वं कथं निरीक्षेत किंच यद्यपि त्वं बहुरमणीरमणस्तथापि - दे

कृतास्मद्भूतफलत्वेनास्मदर्थमेवप्रकट इति विबतो ऽस्माकमेवसुखदोऽस्तीति सूचयन् स्व
५ मंडलीमंडनायमानश्रीराधिकावशगत्वमाहुः राधालोचनेति राधालोचनकुवलमोदन
प्रमोदकर एतेनाऽलौकिकमानत्वं ध्वन्यते लौकिकास्तु तापजनको ऽयं तु सर्वेषां तान्निवा
रक इत्यलौकिकत्वं अथवा ससर्वदोषराशिमरे वायं त्वाधिकारिभेदेनोभयविधोपीत्यप्य
विरोधः नन्वेवंरूपगुणशीलत्वं मयि वर्णितं चेदग्रेदास्यामेवाधुनैव का त्वरेति चेदाहुः का म्ये
मवरदेति त्वं कामवरदोसि यदैव भक्तानां प्रचुरकामना जायते तदैव तेभ्यो वरं ददासि त
न्मनोरथं पूरयसि यद्वा कामे सति कामनायां जातायां वरं भर्तारं सर्वसाधारणां गतिं भर्ता
सर्वे पतिः स्यादित्यादिवाक्यैः विशेषेणास्माकं मन्नाथं मत्परिग्रहमिति भगवदुक्त्यैव च्च व
रपदस्य शक्तिस्त्वय्येवेति त्वमेव वर इति ॥ स्वस्वरूपं ददासि अतोधुनानि प्रचुरकामनाजा

तेति सर्वथातद्वातव्यभितिभावः यद्वापदन्नयमिदं तथाचराधालोचन् तस्यामेवालोचनंज्ञा
नंयस्यसैव वा तत्तस्मिवायस्यसतथा अग्रेतस्याएवकुवलय यदार्ष्टांनिकीभूत यावदंगानां
मोदन प्रमोदकरः शिष्टंपूर्ववत् अथवातस्मिन्नेवसः प्रमोदतद्दर्शनएव तेनैववाकाम
इच्छाऽनंगोवाक्रमेरा यस्येतिकुवलय नोदनकामेति अग्रेवरदः सर्वाभीष्टवरदेत्यर्थः य
द्वा राधालोचनेकुवलयमोदनेभानुभूते सर्वप्रकाशके नेत्रीभूतेवायस्येति तथा एतेन न
तत्स्वरूपावलोकन सांमुख्यएवतत्वसर्वं याथातथ्येन प्रकाशते ऽन्यदात्वन्यथैव तदुक्तंगीत
गोविंदे वहतिमलयेत्यत्रदहतिशिशिरमयूखवइति अग्रेकामःकंदर्पस्तमेववरत्वेनददा
सि यद्वा तल्लोचनकुवलयमोदनकामएतेन यथाविस्मरारदर्शने आविर्भावचेतरस्त्री
नयनप्रकाशस्तथात्व दर्शनेनस्वामिनीनयनारविंदप्रकाश इतिभावः तेनास्माकं विशेष

तस्तस्याश्चनयनसरोजन्नूंषित्वदर्शनएवप्रकाशंतेनान्यदेतिसूचितं कामोपिलौकिको
नास्मासुकिंतुत्वद्रूपएवेतिनिर्दोषत्वमपि यद्वा तस्यास्तन्मोदनेएवकाम इच्छायस्यस
तथा कदावाहंगत्वोतन्नयनेविकासितेकरवाणीतिसततमेव मेवमनसिकुर्वंतिष्ठसि
तदधुनाकथंविलंबसइतिप्रार्थना किंचनकेवलमस्माकमेवेष्टदः किंतुसाधारण्येन स
र्वेषांयतस्त्वंवरदोसि अतोऽस्माकंसाधारणत्वेनापित्वदंगसंगवरोदातव्यमितिता
त्पर्यं यद्वा तस्यालोचनयोःकुवलयतद्वछैत्यकर अग्रेमोदनकामवरद अत्रायमर्थः
केवलवरदत्वेआंतरंतुपरंफलमितिन्यायेनतस्यापिफलत्वेनवरत्वात् कामवरदत्वेन
कामस्याभिसंयोगवियोगात्मकत्वंनोभव यथापितद्द्येयमेवेतिमनुषे चेन्न यतोस्माभि
स्तथैववस्तुयस्य मोदनकामवरदेति मोदनःसंतोषकरोयः कामःसयोगात्मकस्तमेव

वरत्वेनददासीति यद्वा राधायाः आद्रीषदर्धविकासिते लोचनकुवलये मोदने संतोषके
यस्य स तथा एतत्तु यष्टे कदाचित्सकलरात्रिं निर्भररमणनिष्पीडननर्मपरिहासादिभि
र्गमयित्वा किंचिदवशिष्टायां तस्यां राधावद्दत्र भौ निद्रालूस्तदाविदितसंकेता एव तास्तद
लौकिकशोभावलोकनेन स्वजनुः साफल्यकरणार्थं प्रातरेव समागतास्तदातन्मंजरादि
ध्वनिश्रवणाजागरणेन प्रभुणोच्छ्वाय राधापि तत्तिष्ठोनिष्ठाप्रेयेऽतिकालो जातः सर्वाः
सख्य आगता इति वाग्रच नैरांदोलनादिभिश्च जागरिता तदार्द्धजाग्रतायाउत्तिष्ठंत्यास्त
स्या अर्द्धविकसिते सालस्ये सप्रणाये ऽति सरसे नेत्रे ऽवलोक्य केनाप्यनिर्वचनीयानंदेना
नंदितोऽभूदिति तत्सामयिकं तत्स्फुटत्वोक्तं अत एव तयोः कुवलयत्वं तदाउखव्यूरसात्म
कत्वेन जागरणश्रमादिप्रसृतांजनत्वेन च नीलत्वात् सामान्यतोंबुजवाचकत्वेप्युन्नि

८

द्रुताद्दशोदित प्रियाप्रणय प्रकल्पित चुंबन चेष्टित संचिततांबूलतस्यापि रागेणासंमिलित
त्वेनारुणत्वं किंच तदैव तस्याः कामवरदोपिजातस्त्वं तत्कालीनतादृक्न्नेत्र शोभावलो
कनेन समुदितरसभरस्तामरमोऽपितदेति भावाः यद्वा अव्यवधानोक्त एवपूर्वावसरे
तस्या ईषद्विकसितनेत्रयोस्तादशानामेवकुवलयरूपांगानांच मोदनेन तेषु तत्र तदाचि
त चुंबनताडनकरिकर क्रीडनदंतदशनखोद्दत्रेखादि विविधविलासरचनेन तस्यैकामवरं
कामश्रेष्टं विपरीतसुरतरूपदं दासीति तथा तदातवतथा करणोनोत्पायायास्तुद्बुद्धरसा त
था रमणं करोतीति भावः एतेन तस्यास्त्वमेव तदाषंभाव नृत्योद्यमस्तत्र धारोऽभूरिति
निर्गवः पूर्वंनेत्रविकासेजात एतदनु सर्वावयवविकास इति पृथक्दुक्तिः यद्वा तस्या
ईषल्लोचनानि नेत्रांतमात्रोद्भवाः कटाक्षास्ते मोदजनकायस्य स तथा एतनु कदाचि

द्रोपसीमंतिनीसंसादिताभिः सहरसगोष्ठीपरतयोपविष्टं गोपीपतिं प्रतिपरमप्रेयस्या
त्वयाताभ्यः संगोप्यनेत्रांचले नैवचेलांचलांतरतः किमप्यातिसरसमरुन्चि तदाप्रभु
राप्यवगतत्तत्वतयाऽत्यंतमहर्षिस्तदा तादृशएनाभिरदर्शीति तत्स्मृत्वोक्तं शेषंपू
र्ववत् यद्वा त्वंस्वस्यैवेषद्वत्रोचनाभ्यां प्रमृदमदन मदघूर्णायमानाभ्यां कुवलयैस्तदू
पांगैश्च स्मरवादिभिश्चुंबनादिद्वारातस्यामोदजनको निसर्गतोयः कामस्तमेववरात्वे
न तस्यैददासीनिति ऽं यएभिरेवत्वद्रचित्त बाल्यक्रीडनकैस्तस्यारसव्याप्तिर्जायतइति
सिद्धं एतावन्मात्रमधुनाकुतोनाक्रियत इत्यभिप्रायः अतएवोन्मद मदनमाद्यद्युवति
वरिष्ठानां पूर्वोक्तंसर्वरसपूर्तिसाधनत्वेनोपदिष्टं वात्स्यायनादिभि अथवाभगवदंगखी
रात्वंसूक्ष्मत्वंबाल्ये तत्स्मृत्वोक्तं तथाचतादृक्कत्वलोचनादिभिस्तस्यैमोदनकामवर

ददासीतितथा तद्वाऽतिरभसत्व तदीयसूक्ष्मांगावलोकनेन तयास्वस्याग्रेऽनातिदीर्घकालएवावश्यं भाविफलाशया संतोषातिशयजनकोयः स्वेच्छानुरूपफलप्राप्तिरूपोवरः सप्राप्यत इत्यर्थः तदुक्तंप्रेंखपर्यंकशयनेतिगीयते यद्वा तस्यात्त्ववलोकनं त्तयावलोकनं मयादीत्य कुवलयमोदनोसि स्वयंप्रकाशः सर्वंप्रकाशयसि नोचेदुभयोरेकमनः म्लाननावत्वात् नाह्निमेघाविधुंतुदादि मालिनोरविःप्रकाशते तथात्र ताद्दिप्रयोगादिः किंच तदैवकाम वरदोप्यासिनोचेत्तदनन् मतेकस्मात्त्वपितंनददासि इत्यत्रापिहेतुम्लानिनैव एवंसतितस्यांयोमानादि सारसपोषार्थमेवेदिक यद्वा तस्यालोचनयोः कुकुत्सितायामिति – त्तषायां कव्यां वलयेषु तद्वद्दलांगेषुचकुच ऽं नाभिजघन नितंबश्रोणिषु मोदनंयस्मात्सतथा तैर्वामोदनंयस्मिन् अथवा

कुत्सितानिबलयानियेभ्योंगेभ्यस्तानि सद्वर्तुलानि कुचादीनीत्यग्रे पूर्ववत् यद्वा तयात्तत्वालोचनयोः कुवलयसपक्षांगेच अथवाकुवलयशब्देन भूबलयरूपे कोटे प्रदेशेमोदनं संतोषणंयस्य सत्तथा एतेन तस्यास्ते तत्रतत्रत्तद्वाचित चौष्टितान्चरणोनत्वयितथासंपद्यत इत्याशयः नत्वावयोरभीष्टारजन्येवेति तस्यामाविर्भूय युष्मन्मनोरथंपूरयिष्यामीति चेदाहुः अंजनेति अंजनमेवरजनीतस्यामेव प्रकटेति त्वमस्मन्नयन योरंजन रजनीवत्त्वाद्यथासर्वदाविर्भवसितथाऽधुनापितयोस्त इत्वादाविर्भवेत्यर्थः ननु तावत्पूर्व दृष्टमेवमद्रूपं स्मर्यतांतद्द्वारैवांतराविर्भविष्यामितं काञ्चित्त्युक्तमनसोपिमदाविर्भाव एवेतिचेत् ने· तत्र गोर्गी वेतिपदात्सोस्माकं सर्वदाभीष्टोनेत्याभिप्रेत्यसंबोधयंति तस्यांप्रकटेति त्वंप्रकटएव चेद्भवसितदैवास्मन्मनोरथःसिध्यतीति

भावः अथच नत्वं जनस्य श्यामत्वात् रजनीत्वमात्रं संभवतीभिः संपादितं परं तत्सं
८ बंध्यन्यत्सर्वमपेक्षितं तत्कुत्रेति चेदाहुः तारेत्यादी चंद्रस्त्वमेव तत्राऽमृतं तवैनाऽ
धरामृतं तारात्वमस्मद्दत्तोत्तनानामेव अथवा तत्रापि भक्तसहितएवाविर्भवसीति ता
एवताराः यद्वा अंजनरजत्यां तमिस्रायां प्रकटागृहांतिकुंजमागता या तारा गोपी तया
आसमंताद्भूतः मिलितेतितथा तमिस्राभिसारिकया सहांधकास्वरमणोकोपि महा
न्नस एं विशेषउत्पद्यत इतितथा अयमर्थः प्रकाशचाक्षुण प्रत्यक्षयोर्दंपत्योस्तु परस्प
रंसौंदर्यचातुर्यविलासादिषु विभावकादिषुच मनः संपूज्यते तदभाववत्यंधकारेतु केवलं
रसएवत्यनुभवैकवेद्यगूढाभिसंधि अतएवपूर्णारसावस्थायां स्वाभाव्यात्स्वतएवाक्षि
मुद्रणांजायते अग्रेप्यतएवाधरामृतस्यंदेति संबोधनं धरासंबंध्यमृतं धरामृतं नधरामृत

मधराऽमृतं तत्स्यंदेति धरेत्यपलक्षणमात्रं वस्तुतस्तु त्रिलोकीसंजातसद्वस्तुमात्रमप्येत्त
तुलनां नाप्नोति तथाच सर्वतोऽधिकाऽलौकिकाऽपूर्वामृतवर्षिन्नित्यर्थः एतत्सर्वमभि
संधायैव जयदेवेन लौकिकरसस्वरूपमाश्लेषादस्त्विँश्लोके अतएवात्रश्लोके इहकोनकोन ति
तमसीत्यत्रे हेति पदमुक्तं इहकोर्थः अस्मिन्लोकेपीयंरीतिः किंवाच्यमलौकिक इत्यभि
प्रायेण यद्वाअंजनेति भिन्नसंबोधनं एतेन यथा तदंतर्वहिश्चैकरूपं तथा त्वं मलिनाशयो
पीति भा॰ एवंभूतोयोस्मन्नेत्रभूषणीय स एवेत्यपि ध्वनि अग्रेपि विशेषणत्रयं पृथगेव तथा
चरजन्यां प्रकटः संपूर्णरात्रि रसभावनायां प्रकट इत्यानुभूत इति तथा किंच न देवतारावृत विचि
त्रबंधोद्भूतश्रमजलकणिकावृतो जातस्तदेति तथा यद्वा तस्यां स्वप्नादिद्वारा। प्रकटेति तत्रा
पि नैककएत्वं तथाचेद्भ्रमोपि शंकनीयः किंतु नाराभूताभिर्गोपीभिरावृतस्ता अपि साक्षिभूताः

संत्यक्तेति हृदयं किंच स्थितमन्यद्यत्वं भावनास्वप्नादिष्वेवाधरामृतस्यंदोप्यभूत्तद्द्वयमालीढतावकरसा एव वदामः नत्वत्र प्रत्यक्षे प्रमाणांतरापेक्षा अतः सद्य एव भवताऽनाक्षिगोचरिभूतं यत्तत्किमपराद्धमस्माभिरिति भावः अतएव पूर्वोक्तं कुटिलाशयत्व वंचकमंज ~~कमंज~~ नेति संबोधनं संजाघटीति ननु स्वाप्निकादिके कथं प्रत्यक्षमिति चेत् न भगवद्रसशक्तेरलौकिकत्वे नलौकिकोपपत्त्यप्रमेयत्वेन यथा वेणुद्वारा ताः प्रभृतिजडांतेषु रसपूरणमेव मेवं स्वप्नादिष्वपीति नानुपन्नं किंचित अतएव त्वयाभिरमिता इत्यत्राचार्यैरप्युक्तं स्वप्नादिद्वारेति यद्वा रजनीप्रकट यद्यपि त्वं रजन्यामेव प्रकटोसि·रसिशिरोमणित्वे न परं दिवसेत साधुत्वेनैव तथाप्यधुना ताराभिरस्माभिरेवावृत आवृतो भविष्यसीत्यर्थः वर्तमानसामीप्ये वर्तमानवद्वेति न्यायेन तथा एतेन विभावर्यामिव प्रभातेपि भूरिभामिनीबोभुज्यमानभवन्मनो

भवांएभटी सौभाग्यंभावयितुमत्यंतभावुकोपि विभुर्नेतिभावः अतएवपूर्वंकुवलयमोदने
तिसंबोधनमुक्तं यथासल्लौकिकोपिभानु कुवलयानिमोदन्नेपरंकेनापि ज्ञायतेनकदावा
कथंवामोदयत इति तथात्वमपिसर्वाविदितोभविष्यसीत्याशयेन यद्वा तस्यांस्वप्नादि
द्वाराप्रकटेपिताराभिरस्माभिरावृत अमिलितेति तथा तथाचात्रतस्यांप्रकटश्चताराऽवृत्त
श्चेतिद्वंद्वोज्ञेयः अत्रायमाशयः यद्यपित्वंस्वप्नेप्रकटीभवतितथापितत्राप्यस्म दाद्यालिंगतो
न भवसिपरंदूरएवतिष्ठसि· तथासतिकावार्त्ताऽग्रेरमणापुं शस्याइत्येवमस्मदुपेक्षायां कोवा
हेतुरितिभावः तथातथात्वत्साकल्यमप्यधुनाऽ संस्मृहृदयारूढं सदुःखदमेव भवति रूक्षस
कक्षत्वानुसंधानादितिशेषः यद्वाकर्मधारयोत्र तथाचतस्यांप्रकटश्चासौतयाऽमिलितश्चे
तितथा अयमर्थः त्वंस्वप्नेपिप्रकटीभूयस्मत्परिरंभितोनभवसि यतोनिद्रायामागतायामेव·

खलुस्वप्नसंभव: सैवकदापिनायातीति भाव: यथोक्तंकेनापि या:पश्यंति प्रियंस्वप्नेद्य न्या
११ स्ता:सखियोषित: अस्माकंतुगते कांते गतानिद्रापि वैरिणीति अत्रगतेत्यस्यास्यक्षणामात्र
मपिनेत्रागोचरीभूताइत्यर्थो ज्ञेय: अथवास्वरभेदोऽत्र तथाहि अंजनस्निग्ध: कोमलमु
ख्यरसात्मकारजनीप्रकटयसीतिरजनीप्रकट रजनीकर रसोद्बोधक तारावृत गोपी वेष्टित र
सभोगतत्पर अधरामृतस्यंद सर्वरसपूरक अथवातारावृताधर घोषसीमंतिनीभिर्वृतंवेष्टितं
स्वी – तंवाऽधरं कटेरधोभागोवायस्यतादृश अमृतस्यंद· सर्वरसपूरक अथवातारावृत
धर: घोषसीमंतिनीभिर्वृतंवेष्टितं तद्द्विषिन्निति एतावताऽस्माकंत्वमेवरसरूपस्तदुद्बो
धकस्तद्भोक्ता तद्दाताचेति सर्वत्वदुक्तमेवास्मास्वस्तीति नान्यानुरोधेनापिविलंबनीयमि
तिभाव: एवमातिसदैन्यप्रार्थनया भगवानस्मत्सुखदानार्थमेवप्रकटोऽतस्त्वांविनाऽस्मा

कमेकोपि यः क्षणः प्रयाति स युगशतायते कोकल्पाधोगतस्थमुज्यमान नानादुःखा
यते वृथासंभवायते चेति किमिति स्वप्राकल्पप्रयोजनाविरुद्धं विधीयत इति ज्ञापितं यतः
स्वसर्वस्वरूपे प्रभौ दासीभिरे तवदेव कर्त्तुमुचितमग्रे परंतादृछैव प्रमाणमित्यल्पमतिलेख
नेन अथ वैतद्दीनात्पूर्वं निजमंडलौधमध्य स्थितंतं ताः साक्षिमन्यमाना इत्युक्तत्वेन व
ह्नवीवल्यिते शवदनस्यास्मिन्नीते विधुत्वविधानन च यथा सपरिवेषः सोवश्यं वर्षत्ये
वैवमस्यापि परिवेषायितस्ववेष्टितत्वेन वर्षणावश्यकत्वं बोधयंत्यस्तथास्थितं प्रभुस
मक्षमेव प्रार्थयंते विधुमधुरेत्यादि तथाच्चैतावद्ध ह्वामाणां सर्वं भवता संपादितमतः
परं स्यंदेति पदसंबंधः अर्थस्तु पूर्वमस्मन्मंडली समागतमात्रस्य तवमु ऽ खचंद्रावलोक
ने जाते तापोऽपगतः सौख्यमप्यजनि तदनु परमकृपावलोकनेन त्वमय्यस्मन्य मादरम

य्यदाः ततोनुयो मनसिजः पूर्वमस्मत्पीडाजनकतयास्थित स्तस्यापि मानमखंडीः अनंतरं
साधारण्येनास्मन्नयनचकोरेषु स्वस्वरूपमाधुर्यप्यपूरीः पश्चादस्मत्कदंबशिरोमुकुटाय
र्मेन श्रीराधायालोचनकुवलये मोदने संतोकेयस्य तादृशो प्यासीः पुनस्तस्याविशेषतः
कामवरदो प्यजनिष्ट एवंसत्येतावत्सर्वंत्वयाकृतमेवातःपरं किंचदवशिष्यते तदपि वि
क्रीते करिरी किमंकुशे विवाद इति वत्संपादय तत्किमित्याकांक्षायामाहुः अंजनेत्यादि
संबोधस्यदेत्यंतिमेन तथाहि हे अंजनीभूतायां सर्वनेत्रविकारनिवारणक्षमायां रज
न्यां प्रकट प्रादुर्भूतेतितथा धन्यासारजनीयस्यां त्वंप्रकट॰ं स्तस्यांजातायामेव खलु तत्र
त्वत्प्राकट्येनास्मन्नेत्राणां दोषनिवृत्तिर्विसतप्राप्तिश्च जायतेति भावः किंच तारावृतास्म
द्वेष्टिता एतेनास्मदभीष्टंचेन्नदा॰ं स्यासि तदास्मद्यंत्रणात्क्वयास्यसीतिनिगूढपरिहास

ध्वनिः अपिच अधरं तुच्छममृतं यस्मादिति नादृश एतेनात्र बाह्यतः पेपीयमानोपि त्व
मुत्तरोत्तरमपूर्वापूर्वरुचिरोचक इत्यस्माभिर्मुहुर्मुहुः प्रार्थ्यस इति सूचितं तथाचसमीति
हे एवंवर्णित गुणान्नतःपरं । त्वं स्यंदास्यंदते प्रस्त्रवणार्थकत्वादानिसर्गभावंनिधुवन
क्रीडांवितर यतः पूर्णोरसस्त्वदेव संपद्यत इति रसशास्त्रसिद्धांतोस्तीत्यतः परमेताव
देवावशिष्टं तत्तदपि विधेहीत्यनंगाग्निसंतापितस सर्वा गोप्य इति बुभुक्षिताइव बुभुक्षि
तः किंन करोतीति न्यायेन सकुलांगनानां कर्त्तुमनुचितमपि स्वयं दूतीत्वमयमपि रसो
नुभावनीयो भगवतीति कृतवत्यः प्रार्थना नान्याजानामित्यलमतिधार्ष्ट्येन ॥
एवंविवृतभावो यं व्रजेशः स्फुरतान्मयि अंगीकरोतु सेवां चमत्कारादिकृता सदा १ यद्य पी
मेतिसंगोप्या भावाः प्रोक्ता यथामति मयाथाप्यत्र मे शक्तिः कारणं नेत्यदुष्टता २ तथाप्यज्ञान

भावानांवाक्यानांनोचितायतः विद्वानिस्त तक्षमंतु श्रीविठलाह्वयपराधकं ॥३॥ श्रीविठलात्म
१३ जातश्रीबालकृष्णाभिधप्रभून् नमामितातन्चरणां तथाश्री द्वारकेश्वरम् ॥४॥ शुभम् ॥